॥ कारकप्रारंभः ॥

५००

Dr. BHAU DAJI MEMORIAL

॥श्रीमल्लारयनमः॥सकळगुरवेनमः॥प्रयोगमिछता
ज्ञातुं ज्ञेयंकारकमादितः॥संज्ञायाःषड्विधंभेदास्त्रयोविं
॥१॥ ज्ञातिधापुनः॥१॥योयथाविहितंशाब्दप्रयोगंज्ञातुमिछति॥
तेनोदौकारकंज्ञेयंतच्चकारकसंज्ञया॥२॥षड्विधम्॥कर्त्त॰ ॥१॥
कर्म्म॰करण॰संप्रदान॰अपादानाधिकरणानीति॥तद्भे
दाःपुनस्त्रयोविंशतिधाभवंति॥तत्रपंचविधःकर्त्ताकर्म्मस
प्तविधंभवेत्॥करणंद्विविधंचैवसंप्रदानंत्रिधामतं॥१॥
कर्त्ताकर्म्मचकरणंसंप्रदानंतथैवच॥अपादानाधिकरणमित्याहुःकारकाणिषट्
सप्तमी
५

स्वतंत्रकर्त्ता॰हेतुकर्त्ता॰कर्म्मकर्त्ता॰अभिहितकर्त्ता॰अन
भिहितकर्त्ता॰चेतिपञ्चविधः॥तत्राद्योयथापुण्यंकरोति
मन्ति॰ श्राद्धः॥मैत्रीभजन्तेसंतः॥इतिस्वतंत्रकर्त्ता॰॥अथहेतु
कर्त्ता॰॥अथहेतुकर्त्ताहितेलंभयंतिविनीतान्धीराः॥
कुशाएवलोकंनियमयन्ति॥तत्प्रयोजकोहेतुश्चेतिहेतुक
र्त्ता॰॥अथकर्म्मकर्त्ता॰स्वयमेवमुच्यंतेकुशलबुधयः॥
क

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्वयमेव हृतंयन्ते दुष्टजनदोषाः ॥ स्वयमेव छिद्यंते प्राकृ
नस्मे तजस्नेहाः ॥ कर्म्मवत्कर्म्मणा तुल्यक्रियः ॥ इति कर्म्म
वद्भावः ॥ अथाभिहितकर्त्ता ॥ साधवः परार्थमापादयंति ॥
॥२॥ अथानभिहितकर्त्ता ॥ साधुभिरापाद्यंते परार्थाः ॥ अथ ॥२५॥
कर्मसप्तविधम् ॥ ईप्सितम् ॥ अनीप्सितम् ॥ ईप्सितानीप्सि
तम् ॥ अकथितम् ॥ कर्तृकर्म्म ॥ अभिहितं कर्म्म ॥ अनभि

हितं कर्म्म चेति ॥ तत्रेप्सितं यथा ॥ दुर्विज्ञानमपि धर्म्मं
ज्ञातुं श्रद्धालुदारधीः ॥ कर्त्तुरीप्सिततमं कर्म्मेति कर्म्म
संज्ञा ॥ अनीप्सितं यथा ॥ कल्याणमपि धर्म्मं प्राक्षिपंति
पापबुद्धयः ॥ विषं भक्षयंति क्षुद्राः ॥ तथाप्युक्ते चानीप्सि
तमिति कर्म्मसंज्ञा ॥ ईप्सितानीप्सितं यथा ॥ पायसं भ
क्षयन् उपरि रजः पतितं प्रत्यभ्यवहरति कुमारः ॥ अ

आग्रहेण ग्रण्हाति

यज्ञे आहूतिं ददाति इति यज्ञदत्तः

नाहं तत्वाद्र जसो नैवेप्सितानीप्सितत्वं ॥ अथा कथितं ॥
गां दोग्धि पयो गोपालः ॥ यज्ञदत्तं कंबलं याचते ब्राह्म
णः ॥ ईप्सितारं याचते सुवर्णमकिंचनः ॥ व्रजमवरुणा
॥२॥ द्धि गां गोपालः ॥ उपाध्यायं पृच्छति शास्त्रं शिष्यः ॥ वृ
क्षमवचिनोति फलानि दारकः ॥ शिष्यं ब्रवीति धर्मं
गुरुः ॥ पुत्रमनुशास्ति शास्त्रमुपाध्यायः ॥ अकथितं ॥३॥

वंशातटः

चेति कर्म्मसंज्ञा ॥ कर्तृकर्म्म यथा ॥ गच्छति शिष्यो ग्रामं ॥
गमयति शिष्यं ग्रामं गुरुः ॥ तत्र गतिबुद्धीति कर्म्मसं
ज्ञा ॥ अभिहितं यथा ॥ कटः क्रियते देवदत्तेन ॥ अनभि
हितं यथा ॥ कटं करोति देवदत्तः ॥ करणमद्विविधं करणं ॥
बाह्यमाभ्यंतरंचेति ॥ शारीरावयवादन्यद्बाह्यं यं
शास्त्रेण था ॥ दात्रेण लुनाति व्रीहीन्नरः ॥ परशुना वृक्षंछिन
हि

४ त्ति देवदत्तः॥ अथाभ्यन्तरं॥ शारीरावयवाश्रि
तं यत्तदाभ्यन्तरं॥ यथा मनसा पाटलिपुत्रं ग
च्छति देवदत्तः॥ चक्षुषा रूपं गृह्णाति॥ साधक
तमं करणमिति करणसंज्ञा॥ कर्तृकरणयोस्तृ
तीयेति तृतीयाः॥ कतमत्त्रिविधं सम्प्रदानं॥ ध
प्रेरकं॥ अनुमन्तृ॥ अनिराकर्तृ॥ तत्र प्रेरकं
सम्प्रदानं यथा॥ ब्राह्मणाय गां ददाति धार्मिकः॥

स हि ब्राह्मणो नरमासाद्य गां मह्यं देहीति प्रेरयति॥ त
स्मात्प्रेरकमित्युच्यते॥ अनुमंतृ यथा॥ अतिथये वृक्षमू
लं ददाति तपोधनः॥ स ह्यतिथिः वृक्षमूलं मह्यं देहीति
न तावत्प्रेरयति किंतु दीयमानमनुमन्यते॥ तस्मादनुमंतृ
इत्युच्यते॥ अनिराकर्तृ यथा॥ पुरुषोत्तमाय पुष्पं ददाति
पुरुषः॥ स पुरुषोत्तमो मह्यं पुष्पं न ददातीति न निराकरो

योग्यता नीप्साप दार्थं नति वृति सा दृश्ये पु ४

तितस्माद निराकर्त्तृ इत्युच्यते ॥ कर्म्मणायमभिप्रैतीति सं
प्रदानाच्चतुर्थी ॥ अपादानं द्विधाचैव तथाधारश्चतुर्विधः ॥
करोति कारकं सर्वं तत्स्यतेत्र विवक्षया ॥ २ ॥ कतमद्द्विविधम
५ पादानं चलमचलं चेति ॥ तच्चलं यथा ॥ धावतो रथात् पति ५
वर्ज्जने५ तः सारथिः ॥ परिधावतो हस्तिनोऽंकुशं धोरणः ॥ अचलं य
था ॥ ग्रामादागच्छति देवदत्तः ॥ पर्वतादवतरंति महर्षयः ॥
एवमपायेऽपादानम् ॥ ततः पंचमी ॥ कतमच्चतुर्विधमाधे

पुरुषः दौ

करणार्थम् ॥ अभिव्यापकमौपश्लेषिकं वैषयिकं सामी
पिकं च ॥ अथ व्यापकम् ॥ तिलेषु तैलं व्याप्तम् ॥ अथौ
पश्लेषिकम् ॥ कटे आस्ते पुरुषः ॥ शकटे आस्ते विप्रः ॥
गोष्ठिहिषी पालकः अथ वैषयिकं ॥ वनेषु शार्दूलाः वसंति ॥ सामीपिकं यथा ॥
नद्यां वसति घोषः ॥ आधारोऽधिकरणमित्यधिकरणे सप्त
मी ॥ यदि करोति कारकमित्यर्थसंज्ञा तर्हि कर्त्तैव कार

५ काभिधेयः नेतरे॥ अत्रोच्यते॥ तान्यपि कारकाण्यवकु
तः॥ तत्तद्व्यापारेपि॥ स्यातंत्र्यविवक्षायां प्रतिकारकं
स्यातंत्र्यं विवक्ष्यते॥ अतः कर्म्मकरणसंप्रदानापादा
नाधिकरणानामपि कारकत्वं सिद्धम्॥ तत्रेति कर्त्र्य
भिहि प्रथमैव विधीयते॥ तृतिया वाथवा षष्टी स्मृतान
भिहिते तथा॥ २॥ तत्रेति कर्तृ कर्म्मकरणसंप्रदानापा ६

दानाधिकरणेषु मध्ये अभिहिते कर्त्तरि प्रथमैव भवति॥
यथा पचत्योदनं देवदत्तः॥ अनभिहिते कर्त्तरि द्वे वि
भक्ती भवतः॥ तृतिया वाथवा षष्टी॥ अथ तृतिया॥ ओद
नः पच्यते देवदत्तेन॥ कर्तृकरणयोस्तृतिया॥ अथ
षष्टी॥ परलोकाहितस्य सेव्यो धर्म्मः॥ परलोकहिते
न वा सेव्यो धर्म्मः॥ कृत्यानां कर्त्तरि षष्टी चेति॥ तथा

कर्म्मण्यभिहिते विभक्तिं विधिपूर्वकाम्॥ अनुक्ते प्रथ
मां हीत्वा पंचमीं सप्तमीं तथा॥४॥ यथाभिहिते कर्त्त
रि प्रथमा॥ तथा कर्म्मण्यभिहिते प्रथमैव भवति॥ यथा
॥७॥ ओदनः पच्यते देवदत्तेन॥ अनुक्तेति॥ अनुक्ते कर्म्म ७
णि प्रथमां पंचमीं सप्तमीं वर्जयित्वा शेषाश्च तस्या
विभक्त्यो भवंति॥ ताः काः द्वितीया तृतीया चतुर्थी

षष्ठी चेति द्वितीया यथा॥ ग्रामं गच्छति पुरुषः॥ कर्म्मणि
द्वितीयेति द्वितीया॥ अथ तृतीया॥ पुत्रेन संजानीते
पिता॥ पुत्रं जानीत इत्यर्थः॥ संज्ञोन्यतरस्यां कर्म्मणी
ति तृतीया॥ चतुर्थी यथा॥ ग्रामाय व्रजति पुरुषः॥ ग
त्यर्थकर्म्मणीति चतुर्थी॥ षष्ठी यथा॥ कटस्य कार
को देवदत्तः॥ कर्तृकर्म्मणोः कृतीति षष्ठी॥ ॥इति

यापंचमीचैवषष्टीचकरणेत्रिधा॥षष्टीचतुर्थीतृति
यासंप्रदानेतथात्रिधा॥५॥परशुनावृक्षंछिनत्ति
देवदत्तः॥कृतकरणयोस्तृतिया॥पंचमीयथा॥स्तोका
न्मुक्तः॥स्तोकेनमुक्तः॥करणेचस्तोकाल्पकृछ्रेतिपं
चमी॥षष्टीयथा॥घृतस्यसंजानीतेमित्रम्॥नमित्रं
प्रेक्षतइत्यर्थः॥ज्ञोविदर्थस्यकरणेइतिषष्टी॥पु

साद्रश्री

रुषमृगश्चंद्रमसोदातव्यः॥चंद्रमसेदातव्यइत्य
र्थः॥चतुर्थ्यर्थेबहुलंछंदसीतिसंप्रदानेषष्टी
चतुर्थीयथा॥क्षुधितायऔदनंददातिदेवदत्तः॥
चतुर्थीसंप्रदानेइतिचतुर्थी॥तृतियायथा॥दास्यामा
लोसंयछतेकामुकः॥दास्येमालांददातीत्यर्थः॥स
मस्तृतियेति॥दानश्चसाचेतिचतुर्थ्यर्थेतृतीया७॥

यं तेनसंभाव्यते तत्तियाविभक्तिरात्मने॥ यदविधा
नेचयद्योयंयोगास्तत्तिया॥ युक्तोद्वानः॥ धादान
श्वसाचेच्चतुर्थ्यर्थे इयात्मनेपदमेनुरास्ति॥ अ
शिष्टव्यवहारेतत्तियाचतुर्थ्यर्थेभवतीतिवक्तव्यम्
॥ असिष्टव्यवहारोधूर्त्तव्यवहारः॥ पंचमीखल्व
पादानेवर्त्ततेनततोन्यथा॥ सप्तम्यपिवाधिकरणेका

रकस्येषसंग्रहः॥ ७॥ इतिकारकम्॥ पंचमीयथा॥
पर्वतादवतरन्ति महर्षयः॥ अपादानेतिपंचमी॥
सप्तमीयथा॥ ग्रामेवसति॥ सप्तम्यधिकरणेचेति
सप्तमी॥ कारकस्यातिदिङ्मात्रमत्रप्रदर्शितम्॥ का
रकसंग्रहोवृत्त्यादिषुद्रष्टव्यइत्यर्थः॥ इतिवररुचि
कृतेप्रयोगविधिविग्रहेप्रथमपटलः॥ अथलेनप्र

प्रचेन्द्र शिवबुंगाव्या
किंआपवैयाकरण?　　　　बद्रीनाथ ५

कारमी देशे १०॥ तिपालुयेत्॥ ॥ ८६ ॥ वंदेश्री मन्मार्तंडभैरवं ॥
इंद्रश्चंद्रः काशकृत्स्नापिशली शाकटायनः॥
पाणिनी अमरजैनेंद्रा जयंत्यष्टौ वैयाकरणाः शास्त्रवेत्ता ॥१०

कौमदी ७　　　　मुग्धबोध ४　　　　मैयावृद्ध देशे ६

ॐ नमः॥ अथ लक्षितोभिहितानभिहितयोः स्वभावः॥ किं
यन्तस्तमभिधायका अनभिधायका वाउच्यंते॥ समास
स्तद्धितस्तिङ् कृत्ते चत्वारोऽभिधायकाः तएवानभिसंबं
धात् भवंत्यनभिधायकाः॥ ८॥ अस्यामवस्थायामनभिधा
यकाः उच्यंते कर्मणा कर्त्रा वा अभिसंबंधे अभिधायकाः
उच्यंते॥ ताभ्यामेव कर्मकर्तृभ्यामनभिसंबंधे तएव चत्वा
रोऽनभिधायकाः उच्यंते॥ षोढा समासः संक्षेपादष्टाविंशति२८

११

शतिधापुनः॥ नित्यानित्यप्रयोगेनलुकलुकेनचद्विधा ॥९॥ षट् यथा॥ तत्पुरुषः॥ कर्म्मधारय्यः॥ बहुव्रीहिः॥ द्विगुः॥ द्वंद्वः॥ अव्ययीभावश्चेतिषट्समासाः॥ तएववि स्तरेणाष्टाः विंशतिधाभवंति॥ पश्चात्तद्विभागवक्ष्यामः॥ ११ नित्यानित्येतिद्विविधः समासोभवति॥ नित्योऽनित्यश्चेति॥ नित्योयथा॥ प्रकर्षेणावरः॥ प्रवरः॥ कुंभंकरोतीकुंभका

रः॥ यदिनित्योयंसमासः॥ तदाकुंभंकरोतीतिकथंवाक्यं॥ नैषदोषः॥ अरः शब्दोनाव्यर्थः प्रतिपाद्यते॥ यथास्त्रीष्व धिकृत्यप्रवर्त्ततेअधिस्त्रि॥ कर्म्मण्यणित्यण॥ उपपद मतिङितिसमासः॥ अनित्यसमासोयथा॥ राज्ञः पुरु षोराजपुरुषः इतिवा॥ ब्राह्मणस्यकंबलो ब्राह्मणकंब लइत्यादिषष्टीसमासः॥ विभाषितत्वादनित्यत्वमुच्यते॥ लुगितिलुकसमासोयथा॥ कष्टंश्रितः॥ कष्टश्रितः॥

द्वित्तियाश्रितेति समासः ॥ कृत्तद्धितेति प्रातिपदिक
॥१२॥ संज्ञा त्सुपो धात्विति सुपो लुक् ॥ अलुक्समासो यथा ॥
कण्ठकालाय स्यस्त कण्ठकालः ॥ उरसिलोमानि य
स्य स उरसिलोमा ॥ सप्तम्युपमानपूर्वेति समासः
कृत्तद्धितेति प्रातिपदिकसंज्ञायां सुपो धात्विति लु १२
कि प्राप्ते ॥ अलुगुत्तरपद इत्यल्त्यधमर्द्धमकस्त
कात्त्वाङ्गादकामरत्यलुक्समासः ॥ तत्राष्टधा तत्पु

रुषः ॥ सप्तधा कर्मधारयः ॥ सप्तधा च बहुव्रीहिर्द्विगुराभाषि
तो द्विधा ॥ १० ॥ श्लोकद्वयम् ॥ प्रथमादिविभक्तिभिः सप्तविधः
नञ्चेति ॥ तत्र प्रथमा तत्पुरुषो यथा ॥ पूर्वः कायस्यापरो वा पू
र्वकायः ॥ अपरकायः ॥ पूर्वापरावराधरोत्तरमेकदेशिनेति
समासः ॥ अर्द्धं पिप्पल्याः कोशातक्या वा अर्द्धपिप्पली ॥
अर्द्धकोशातकी ॥ अर्द्धं नपुंसकमिति समासः ॥ द्वितीयं भि
क्षायाः ॥ द्वितीयभिक्षा ॥ भिक्षाद्वितीयं ॥ एवं तृतीयादि ॥

द्वितीयतृतीयचतुर्थतुर्येति समासः॥ प्राप्तोजीविकांप्रा
प्तजीविकः॥ एवमापन्नजीविकः॥ प्राप्तापन्ने चेति समा
॥१३॥ सः॥ कस्मात्प्रथमातत्पुरुषोयं भवति॥ उच्यते पूर्वपदस्य
प्रथमान्तत्वात्॥ याविभक्तिः पूर्वपदस्य भवति सैतया वि ॥१३॥
त भक्त्याविशेषितत्वात्प्रथमतत्पुरुष इत्युते॥ द्वितीयातत्पुरुषोय
था॥ वृक्षंश्रितः॥ वृक्षश्रितः॥ कान्तारमतीतः॥ कान्तरातीतः
॥ नरकंपतितो नरकपतितः॥ ग्राममगतो ग्रामगतः॥ शरम

त्यस्तः॥ शरात्यस्तः॥ तरङ्गमत्यस्तः॥ तरङ्गात्यस्तः॥ सुखमा
पन्नः॥ सुखापन्नः॥ द्वितीयाश्रितातीतपतितगतात्यस्तप्रा
प्तापन्नैरिति समासः॥ वर्षंभोग्यो वर्षभोग्यः॥ योजनंप्रेरि
तोरितो योजनप्रेरितः॥ कालाध्वनोरत्यन्तसंयोगे इति द्विती
या॥ अत्यन्तसंयोगे चेति द्वितीयासमासः॥ तृतीयातत्पुरु
षोयथा॥ शङ्कुलया खण्डः॥ शङ्कुलाखण्डः॥ तृतीयातत्कृ
त्कृतार्थेति समासः॥ मासेन पूर्वः॥ मासपूर्वः॥ वाचाति

पुणो वाङ्गि पुण: ॥ पूर्वसदृशसमेतिसमासः ॥ चतुर्थीत
त्पुरुषो यथा ॥ यूपाय दारू ॥ यूपदारू ॥ कुंडलाय हिरण्यम्
॥१४॥ ॥ कुंडल हिरण्यम् ॥ तादर्थ्ये चतुर्थी अर्थेन नित्य समास
यज्ञः वचनं सर्व लिङ्ग ता चेव ॥ ब्राह्मणाय अर्थ ब्राह्मणा ॥१४॥
र्थः सूयः ॥ ब्राह्मणार्था भूः ॥ ब्राह्मणार्थं पयः ॥ ब्राह्मणो बलि
रित्यादि ॥ चतुर्थी तिदर्थार्थे तिसमासः ॥ पंचमी तत्पुरुषो य
था ॥ सिंहाद्भयं ॥ सिंहभयम् ॥ पंचमी भयेनेति समासः ॥

श्री

अर्थादपेतः ॥ अर्थापेतः ॥ सुखादपोढः ॥ सुखापोढः ॥ अ
यतापाढेतिसमासः ॥ षष्ठी तत्पुरुषो यथा ॥ वृक्षस्य मूल
म् ॥ वृक्षमूलम् ॥ षष्ठीतिसमासः ॥ ब्राह्मणस्य याजको ब्रा
ह्मणयाजकः ॥ याजकादिभिश्चेतिसमासः ॥ सप्तमी तत्पु
रुषो यथा ॥ अक्षेषु शौण्डः ॥ अक्षशौण्डः ॥ सप्तमी शौण्डैरि
तिसमासः ॥ पाटलिपुत्रे सिद्धः ॥ पाटलिपुत्रसिद्धः ॥ सि
द्धशुष्केतिसमासः ॥ नञ् तत्पुरुषो यथा ॥ न ब्राह्मणो अ

MEMORIAL

चकार बहुव्रीहिं द्वंदः सचासौकर्मधारयः॥यस्यास्ति बहुव्रीहिः शेषतत्पुरुषसमंजः॥

ब्राह्मणः॥नञिति समासः॥सप्तधा कर्मधारयः॥कतमः॥
विशेषणपूर्वः॥विशेष्यपूर्वः॥विशेषणोभयपदः॥उप
मानपूर्वपदः॥उपमानोत्तरपदः॥संभावनापूर्वपदः॥अ
१५ वधारणापूर्वपदः॥इति सप्तधा कर्मधारयः॥तत्राद्योय १५
था॥नीलं चेतदुत्पलं च नीलोत्पलं॥कृष्णसर्पः॥विशेष
णं विशेष्येण बहुलमिति समासः॥द्वितीयोयथा॥वैयाकर
णश्चासौ खसूचिश्चेति वैयाकरणखसूचिः॥मूर्खानिः
कुमः

प्रतिलः॥कुत्सनानि कुत्सनैरिति समासः॥तृतीयोयथा
॥शीतं चतदुष्णं च शीतोष्णम्॥अत्रापि विशेषणं विशेष्य
णेति समासः॥चतुर्थोयथा॥शंख इव पांडुरः॥शंखपांडुरः॥
उपमानानि सामान्यवचनैरिति समासः॥उपमानोत्तरपदो
यथा॥नरोयं सिंह इव नरसिंहः॥पुरुषोयं वृषभ इव पुरुषवृ
षभः॥उपमितं व्याघ्रेति समासः॥षष्ठोयथा॥गुण इति बुद्धिः
॥गुणबुद्धिः॥पुत्र इति ग्रहणं॥पुत्रग्रहणं॥विशेषणं विशेष्य

णा बहुलमिति समासः॥ सप्तमो यथा॥ गुणा एव धनं॥ सुहृत् एव बंधुः॥ सुहृद्बंधुः॥ मयूरव्यंसकेति समासः॥ सप्तधा च बहुव्रीहिः॥ द्विपदः॥ बहुपदः॥ संख्योत्तरपदः॥ संख्योभयपदः॥ सहपूर्वपदः॥ व्यतिहारलक्षणः॥ दिगंतराललक्षणश्चेति॥ आरूढो वानरो यं वृक्षं स भवत्यारूढवानरो वृक्षः॥ इति द्विपदः॥ निर्जितकामः॥ उपनीतभोजनः॥ निष्क्रांतो जनो यस्मात्तं निष्क्रांतजनं नगरं॥ शुष्कपटः॥

१६ ॥१६

उषितविभवः॥ शेषो बहुव्रीहिरित्यधिकृत्य अनेकमन्यपदार्थे ति समासः॥ बहुपदो यथा॥ पराक्रमोपार्जितसंपदः॥ तृतीयो यथा॥ उपसमीपे दशानाम्॥ उपदशाः पुरुषाः॥ उपविंशाः॥ चतुर्थो यथा॥ द्वौ वा त्रयो वा द्वित्राः॥ संख्याव्ययेति समासः॥

पि बहुव्रीहौ संख्येये ऽजिति च समासांतः॥ पंचमो यथा॥ सह मूलेनोद्धृतस्तरुः सहमूलोद्धृतस्तरुः॥ तेन सहेति समासः॥ वोपसर्जनस्येति सहशब्दस्य वा सभावः॥ व्यतिहारलक्ष

११ णो यथा॥ केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम्॥ केशाके
शि॥ दंडा दंडि॥ तत्र तेनेदमिति समासः॥ अन्येषामपि
दृश्यत इति दीर्घत्वम्॥ इच्कर्मव्यतिहार इति इच्स
मासांतः पस्येति चेयकारलोपः॥ तिष्ठद्गुप्रभृतीनि चे ७७
त्यव्ययीभावः॥ अव्ययीभावश्चेत्यव्ययसंज्ञायाम्॥ अ
व्ययात्सुपिति सुपोलुक्॥ दिगंतरालक्षणो यथा॥ दक्षि
णस्याश्च पूर्वस्याश्च दिशोर्यदंतरालं सा दक्षिणपूर्वा॥

अव्ययादित्यनेन लुक्॥ अव्ययादित्यनेन लुक् भवति २

उत्तरपूर्वा॥ दिङ्नामान्यंतराल इति समासः॥ सर्वनाम्नो
वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः॥ द्विगुर्द्विविधः॥ एकव
द्भावी अनेकवद्भावी चेति॥ एकवद्भावी यथा॥ त्रीणि शृ
ङ्गानि समाहृतानि इति त्रिशृङ्गम्॥ पंचमूलम्॥ तद्धिता
र्थोत्तरपदसमाहारे चेति समासः॥ संख्यापूर्वो द्विगुः॥ द्वि
गुसंज्ञायाम्॥ द्विगुरेकवचनम्॥ स नपुंसकम्॥ अकारां
तोत्तरपदो द्विगुः॥ स्त्रियां भाव्यत इति स्त्रीलिङ्गतायां द्वि

गोरितिङीप्॥त्रिभ्रूङ्गादिभ्यस्तु न भवति॥पात्रादिभ्यः
प्रतिषेधो वक्तव्यः इति॥अनेकवद्भावी यथा॥चतस्रो दि
शश्चतुर्दिशम्॥त्रयो लोकाः॥त्रिलोकम्॥दिक्संख्ये सं
॥१८॥ ज्ञायां इति समासः॥द्वंद्वश्चतुर्विधो ज्ञेयोऽव्ययीभावो द्वि ॥१८॥
धामतः॥तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम्॥११॥
द्वंद्वश्चतुर्विधः कथम्॥समुच्चयः॥समाहारः॥अन्वा
२ चयः॥इतरेतरयोगश्च॥तत्र समुच्चयान्वाचययोरसाम

र्थ्यात्समासो नास्ति॥समर्थः पदविधिरित्यधिकारात्॥स
मुच्चयो यथा॥देवदत्तः पचति यज्ञदत्तश्च॥अन्वाचयो य
था॥भिक्षामट गां चानय॥समाहारो यथा॥शंखश्च पट
हश्च शंखपटहम्॥द्वंद्वश्च प्राणितूर्येति एकवद्भावः॥स नपुं
सकसंज्ञः॥इतरेतरयोगो यथा॥देवदत्तश्च यज्ञदत्तश्च
देवदत्तयज्ञदत्तौ॥चार्थे द्वंद्वः॥अव्ययीभावो द्विधामतः॥
नामपूर्वपदोऽव्ययपूर्वपदोऽपि॥तत्राद्यो यथा॥शाकस्य

मात्रा॥शाकंप्रति॥फलंप्रति॥प्रतिशाकम्॥प्रतिफलम्॥
सुप्रतिनामात्रेतिसमासः॥अव्ययपूर्वपदोयथा॥कुंभस्य
समीपेवर्त्ततइत्युपकुंभम्॥अव्ययविभक्तीतिसमासः॥क्र
१९ ममनतिक्रम्यवर्त्ततइतियथाक्रमं॥येयेवृद्धाःयथावृद्धंब्रा
ह्मणानामंत्रयस्व॥यथासादृश्यतिसमासः॥यावदमंत्रं १९
ब्राह्मणानामंत्रयस्व॥यावंयमंत्राणिसंभवंतितावंतो
ब्राह्मणानामंत्रयस्व॥यावदवधारणेतिसमासः॥तेषामि

तिपूर्वपदार्थप्रधानउत्तरपदार्थप्रधानोऽन्यपदार्थप्र
धानउभयपदार्थप्रधानश्चेतिसमासश्चतुर्द्धा॥तत्पु
रुषोद्विःप्रधानः॥पूर्वोत्तरप्रधानइति॥पूर्वोयथा॥पु
रुषवृषः॥उत्तरोयथा॥नीलोत्पलम्॥बहुव्रीहिर्द्विः
प्रधानः॥अन्योभयपदापदार्थप्रधानएव॥अन्योयथा॥
द्विगुरेकप्रधानः॥यथाशंखपटहम्॥उभयोयथा॥
द्वौवात्रयोवाद्वित्राः॥द्विगुरुत्तरपदार्थप्रधानएव॥यथा

त्रिमट्कुम्॥ पंचमूलम्॥ अव्ययीभावस्त्रिप्रधानः॥ पूर्वो
त्तरान्यपदार्थप्रधानेति॥ पूर्वो यथा॥ उपकुंभम्॥ उत्तरो यथा॥
प्रतिशाकम्॥ अन्यो यथा॥ उन्मत्ता गंगा यस्मिन्देशे स
२० भवत्युन्मत्तगंगदेशः॥ अन्यपदार्थे च संज्ञायामिति समा २०
सः॥ स्त्रियाः पुंवद्भाषितपुंस्केति पुंस्त्वम्॥ ॥इति समास
लक्षणं॥ ॥कष्टेन लिखितं ग्रंथं यत्नेन प्रतिपालयेत्॥

श्री

ॐ नमः॥ अथ प्रस्तावसरं तद्धितलक्षणमुच्यते॥ सामान्याव्यय
भावाख्यस्त्रिविधस्तद्धितो मतः॥ पदानां तु समर्थानां प्रथमा
द्वा प्रजायते॥ १२॥ सामान्यवृत्तिः॥ अव्ययसंज्ञः॥ भाववचनं
श्चेति त्रिप्रकारः॥ स च पदानामनेकेषां परस्परसमर्थानां प्र
थमादेव पदात्तद्धितप्रत्ययः प्रजायते॥ तत्र सामान्यवृत्ति
स्तावत्॥ मतुप्॥ लच॥ इलच॥ शः॥ नः॥ इलच॥ णः॥ उरच॥
रः॥ वः॥ वलच॥ इनिः॥ ठन्॥ विनिः॥ युस्॥ ग्मिनिः॥ आलच॥
आटच॥ इनच॥ आरकच॥ आलुच॥ चेलुः॥ ऊलः॥ ऊल
किति ञिञिचवट्रिः॥

MEMORIAL

मांतोपधाद्वतिनो ॥ यमेयमा वा ॥ पदांतेर्नमाना श्रुपायमेषु सेयमा नाभवंति चपासयमहोतत ॥ यमेपरेसति मोनिके ल्पेनभवंती ८

ः ॥ अण् ॥ वुन् ॥ खञ् ॥ ष्फञ् ॥ ढञ् ॥ फक् ॥ यञ् ॥ ढक् ॥ ष्ठर

२१ क् ॥ ढ्कञ् ॥ ष्ठारक् ॥ यः ॥ खः ॥ एयः ॥ यत् ॥ इनः ॥ इतच ॥ अन

ङ् ॥ चेञ्चुप् ॥ इष्णुः ॥ ईयसुन् ॥ तरप् ॥ तमप् ॥ कल्पप् ॥ देश्य

॥ देशीयर् ॥ जातीयर् ॥ रूप ॥ द्वयसच ॥ दघ्नञ् ॥ मात्रच ॥ ठ

क् ॥ इति षड्डपञ्चाशत्प्रत्यया भवन्ति ॥ तत्र मतुप् यथा ॥ गुणो

यस्यास्ति यस्मिन्वा ॥ स गुणवान् गुणवती स्त्री ॥ गुणवत्कुल २१

म् ॥ तदस्यास्त्यस्मिन्निति मतुप् ॥ मादुपधायाश्च मतोर्वोऽयवा

दिभ्यः इति मस्य वः ॥ इलच यथा ॥ चूडा यस्यास्ति यस्मि

॥ मांतोपधाद्वतिनोर ॥ श्री हरधमळ

यस्य लोपः ॥ अवर्णस्य यः ॥ तस्य लोपो भवति स्वरे यकारे च परे ॥

न्वा ॥ स चूडालः ॥ प्राणिस्थादातो लजन्यतरस्यामिति लच ॥

वत्सं कामयत इति वत्सलः ॥ अंसोऽस्यास्तीति अंसलः ॥ वत्सां

सान्यां कामबले इति लच ॥ इलच यथा ॥ फेनोऽस्यास्तीति फे

निलः ॥ फेनादिभ्यश्चेति लच ॥ तुन्दोऽस्यास्तीति तुन्दिलः ॥ तु

न्दादिभ्यश्चेति लच ॥ शो यथा ॥ लोमानि सन्ति यस्य स लोम

शः ॥ नो यथा ॥ पामा यस्यास्तीति स पामनः ॥ इलच यथा ॥ पि

च्छा यस्यास्तीति । स पिच्छिलः ॥ लोमादिपामादिपिच्छादिभ्यः

शनेलचः ॥ णो यथा ॥ प्रज्ञा यस्यास्तीति स प्राज्ञः ॥ श्रद्धा य

आदिस्वरस्य ञ्णिति च वृद्धिः ॥

स्यास्तीति स श्राद्धः॥ आर्द्धः॥ वार्त्तः॥ प्रज्ञा श्राद्धा र्चा वृत्ति भ्यो णः

:॥ उरच यथा॥ दन्ता उन्नता यस्य स दन्तुरः॥ दन्त उन्नत उर

२२ च॥ रो यथा॥ मधु यस्यास्तीति मधुरः॥ ऊषशुषिमुष्क म

धो रः॥ वो यथा॥ केशो यस्यास्तीति स केशवः॥ केशाद्वो ऽ

न्यतरस्याम्॥ विप्रकरणे मणि हिरण्य यो रूप संख्यानम्

॥ मणिर्य्यस्यास्तीति स मणिवः॥ हिरण्यं यस्यास्तीति स हिर

ण्यवः॥ वलच यथा॥ रजो यस्यास्तीति स रजस्वलः॥ स्त्री

चेद्रजस्वला॥ रजः कृष्यासुति धंनि कः॥ अत इनि ठनौ॥ २२

श्री

ठस्य कः॥ विनिर्य्यथा॥ यशो ऽस्यास्तीति यशस्वी॥ अस्मा

यामेधास्रजो विनिः॥ युस् यथा॥ ऊर्णायिस्यास्तीति स ऊर्णा

युः॥ ऊर्णाया युस्॥ ग्मिनिर्य्यथा॥ वाग ऽस्यास्तीति वाग्मी॥

वाचो ग्मिनिः॥ भूरो भूरीति क लोपः॥ आलच [redacted]॥ यो ब

हु संबद्ध भाषते॥ स वाचालः॥ आटच यथा॥ यो बहु संब

५अस्यार्थः द्धं भाषते॥ स वाचाटः॥ आलयाभ्याटचो बहु भाषिणीति॥

इनचर्या॥ फलानि यस्य संति स फलिनः॥ बर्हिनिय

था।

स्यसंतिसबर्हिणः॥ फलबर्हाभ्यामितिवक्तव्येति॥
आरकचयथा॥ शृंगंयस्यास्तीतिसशृङ्गारकः॥ वृंदं
यस्यास्तीतिसवृंदारकः॥ शृङ्गवृंदाभ्यामारकचवक्त
२७॥ व्यं॥ आलुचयथा॥ निद्रायस्यास्तीतिसनिद्रालुः॥ २७॥
तन्द्रालुः॥ श्रद्धालुः॥ निद्रातन्द्राश्रद्धाभ्यआलुच॥
शीतालुः उष्णालुः॥ तृषालुः॥ शीतोष्णतृषाभ्यस्तन्न
सहतेतिआलुचवक्तव्यः॥ ऊढोयथा॥ वार्तानीसमूहे

यस्यलोपः॥ इश्च अश्च यः॥ तस्यलोपोभवतिस्वरेयकारेचपरे॥ इकारअकारायालो
पहोतेस्वरयकारपरअस्तो

मूढोवातूलः॥ वातादूलोवक्तव्यः॥ द्वितीयऊलोयथा॥
वातंनसहतइतिवा वातानांसमूहेतन्नसहतइत्यू
लोवक्तव्यः॥ अण्यथा॥ वसिष्ठस्यापत्यं॥ वासिष्ठः॥ ऋ
ष्यन्धकवृष्णिकुरुभ्यश्चेत्यण्॥ उपगोरस्यापत्यमौ
अरदोनो मिलेगुणः पगवः॥ प्राग्दीव्यतोऽणित्यधिकृत्यतस्यापत्यमि
त्यण्॥ अश्वपत्यादिभ्यश्च॥ जनपदोनिवासोयस्य
सः जानपदः॥ सोस्यनिवासः॥ वैयाकरणः॥ तद

आदिस्वरस्यञ्णितिपरवृद्धिः

आदिस्वरस्य ञ्णिति च वृद्धिः ॥७॥

धीते तद्वेद ॥ नद्याभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामिस्ये
जागमः ॥ वुन् यथा ॥ क्रममधीते वेत्ति वा ॥ क्रमकः
॥ क्रमादिभ्यो वुन्निति वुन् ॥ युवोरनाकावियका
२४ देशः ॥ स्वञ् यथा ॥ पञ्चालस्यापत्यं पाञ्चालः ॥ २४
वैदेहः ॥ जनपदशब्दात्क्षत्रियादञ् ॥ अत्सः ऊ
त्सादिभ्योऽञ् ॥ इञ् यथा ॥ दक्षस्यापत्यं दाक्षिः ॥

दाशरथिः ॥ अत इञ् ॥ फक् यथा ॥ नडस्यापत्यं युन नाडा
यनः ॥ आश्वलायनः ॥ नडादिभ्यः फक् ॥ यञ् यथा ॥
गर्गस्यापत्यं गार्ग्यः ॥ गर्गादिभ्यो यञ् ॥ ढक् यथा
॥ विनतायाः अपत्यं वैनतेयः ॥ गारुडः यः ॥ स्त्रीभ्यो ढ
गिति ढक् ॥ ऐरक् यथा ॥ चटकायाः अपत्यं चाट
कैरः ॥ चटकायाः ऐरक् ॥ ढ्रक् यथा ॥ गोधायाः
अपत्यं गौधेयः ॥ गोधायाः ढ्रक् ॥ लोपो व्योर्वलीति

यलोपः ॥ आरक् यथा ॥ गोधायाः अपत्यं गौधारः ॥
चारगुदीचाम् ॥ घो यथा ॥ क्षत्रस्यापत्यं क्षत्रियः ॥
२५ क्षत्रात्घः ॥ इयादेशः ॥ खो यथा ॥ कुलस्यापत्यं कुली २५
नः ॥ कुलात्खः ॥ खस्य ईनादेशः ॥ ण्यो यथा ॥ कुरो
पत्यं कौरव्यः ॥ कुर्वादिभ्यो ण्यः ॥ यत् यथा ॥ मूर्ध्नि
भवो मूर्द्धन्यः ॥ उरसि भवः ॥ उरस्यः ॥ एवं दन्त्यः ॥

शरीरावयवाद्यत् ॥ इन यथा ॥ कल्याणो गन्धो य
स्य स सुगन्धिः ॥ उद्गन्धिः ॥ गन्धस्येदुत्पूतिसुसुरभि
भ्यः ॥ कुमुदगन्धिः ॥ कारीषगन्धिः ॥ सप्तम्युपमानपूर्व
स्य बहुव्रीहेर्व्याच्योत्तरपदलोपश्च ॥ उपमानाच्चेति समा
सान्तः ॥ इतच यथा ॥ कुसुमानि संजातान्यस्मिन्नसौ
कुसुमितो वृक्षः ॥ तदस्य संजातं तारकादिभ्य इतच् ॥
अनङ् यथा ॥ कुं उपमानमूधो यस्याः सा कुंडोध्नी ॥

DR. BHAU DAJI MEMORIAL

अथ सोऽनङ् ॥ सकारस्य अनङ् आदेशः प्रत्ययसंज्ञा
चे ॥ बहुव्रीहेरूधसोऽङीप् ॥ कुसुममेव धनुर्यस्य स
कुसुमधन्वा ॥ धनुषश्चेत्यनङ् ॥ सकारस्य समासा
२६ न्तः ॥ चरणपूर्वथा ॥ दर्भेण विन्नः ॥ दर्भाश्चरणं ॥ चर्म्म २६।
पयथा ॥ शाकेन वित्तः ॥ शाकचञ्चुः ॥ तेन वित्तश्चञ्चु
प्चणपौ ॥ चुञ्चुप् इति इत्संज्ञा त्वल ॥ लस्य स्वत्वस्यानि
त्यत्वात् ॥ इष्टनेयथा ॥ सर्वे इमे पटवः ॥ अयमति

शयेन पटुः ॥ पटिष्ठः ॥ अतिशयेन तमविष्ठनौ ॥ तु
रिष्ठेमेयस्सुटेर्लोपः ॥ अतिशयेन प्रियः प्रेष्ठः ॥
अतिशयेन स्थविरः ॥ स्थविष्ठः ॥ स्फेष्ठः ॥ वरिष्ठः
॥ बंहिष्ठः ॥ गरिष्ठः ॥ वर्षिष्ठः ॥ त्रपिष्ठः ॥ द्राघिष्ठः ॥
वृन्दिष्ठः ॥ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्र
दीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रपद्रा
घिवृन्दाः ॥ प्रकृत्येकाजिति प्रकृतिभावः ॥ अतिश

येन स्थूलः स्थविष्ठः॥ एवं दूरः॥ युवा॥ ह्रस्वः॥ क्षु
द्रः॥ दविष्ठः॥ यविष्ठः॥ ह्रसिष्ठः॥ क्षोदिष्ठः॥ स्थू
लदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य
२७ च गुणः॥ सर्वेषामतिशायेन बहुः॥ भूयिष्ठः॥ बहो २७
र्लोपो भू च बहोरिति प्रत्ययकारस्य लोपः॥ बहोर्बस्य
भूरादेशः॥ इष्ठस्य यिट् चेति यिडागमः॥ सर्वेषाम
तिशायेन प्रशस्यः॥ श्रेष्ठः॥ प्रशस्यस्य श्र इति श्रा

देशः॥ लघुमृदुकृशपृथूनां॥ लघिष्ठः॥ म्रदि
ष्ठः॥ क्रशिष्ठः॥ प्रथिष्ठः॥ र ऋतो हलादेर्लघो
रिति ऋकारस्य रादेशः॥ तुरिष्ठेमेयस्सु इति वर्त्त
माने टेरिति टेर्लोपः॥ अन्तिकः॥ नेदिष्ठः॥ बाढः॥
बाढिष्ठः॥ साधिष्ठः॥ अन्तिकबाढयोर्नेदसाधौ॥
तन्निष्ठः॥ अणिष्ठः॥ श्येतिष्ठः॥ श्यामिष्ठः॥ हरि

ष्ठः ॥ पिञ्जरिष्ठः ॥ इयसुनयथा ॥ द्वाविमौपटू ॥
अथमनयोरतिशायेनपटुः ॥ पटीयान् ॥ स्थूलः ॥
२८ स्थवीयान् ॥ ह्रस्वः ॥ ह्रसीयान् ॥ युवा ॥ यवीयान् ॥ २८
कनिष्ठः ॥ कनीयान् ॥ युवाल्पयोः कनन्यतर
स्यात् ॥ क्षिप्रः ॥ क्षेपीयान् ॥ स्थिरः ॥ स्थेयान् ॥
प्रियः ॥ प्रेयान् ॥ उरुः ॥ वरीयान् ॥ लघुः ॥ लघी

यान् ॥ तृप्रः ॥ त्रपीयान् ॥ दीर्घः ॥ द्राघीयान् ॥ वृ
न्दारकः ॥ वृन्दीयान् ॥ महान् ॥ महीयान् ॥ सा
धुः ॥ साधीयान् ॥ कृशः ॥ क्रशीयान् ॥ हृष्मः ॥
हृष्मीयान् ॥ मृदुः ॥ म्रदीयान् ॥ दृढः ॥ द्रढीया
न् ॥ ज्येष्ठः ॥ ज्यायान् ॥ ज्यायादीयसइनीयसु
न्नी ॥ कारस्यात्वम् ॥ अल्पः ॥ अल्पीयान् ॥ स्या

मः ॥ श्यामीयान् ॥ पिङ्गरः ॥ पिङ्गरीयान् ॥ द्वि
वचनविभज्योपपदे तरबीयसुनौ ॥ तरप् य
था ॥ अतिशयेन कुमारः ॥ कुमारतरः ॥ एवं प
२९ टुः ॥ पटुतरः ॥ मृदुः ॥ मृदुतरः ॥ कृशः ॥ कृश २९
तरः ॥ लघुः ॥ लघुतरः ॥ द्विवचनेति तरप् ॥
अतिशयेन पचति पचतितराम् ॥ जल्पतितराम् ॥

॥ तिङ श्चेति तितरम् ॥ किमेत्ति ॥ ङ आम्यादाश्चा द्रव्यप्रक
र्षे इत्याम् ॥ तमप् यथा ॥ सर्वासामतिशयेन मृद्वी ॥ मृदुतमा ॥
चपलतमा ॥ अतिशायने तमबिष्ठनौ ॥ कल्पप् यथा ॥ ई
षद्विदिन्द्रो न समाप्यते इति इन्द्रकल्पः ॥ देश्यप् यथा ॥ ईष
त्पर्वतो न समाप्यते इति पर्वतदेश्यो मेघः ॥ देशीयर् यथा ॥
ईषद्राजा न समाप्यते इति राजदेशीयः ॥ ईषदपरिसमाप्तौ
कल्पदेश्यदेशीयरः ॥ जातीयर् यथा ॥ पटुः प्रकारः ॥ प

ड़ जातीयः॥ मृदु जातीयः॥ सम जातीयः॥ प्रकारवचने
जातीयन्॥ रूपा यथा॥ प्रशस्तो वैयाकरणो वैयाकर
णरूपः॥ प्रशस्तः पटुः पटुरूपः॥ प्रशंसायां रूपः॥ द्वय
सच यथा॥ ऊरूः प्रमाणमस्य ऊरुद्वयसं जलम्॥ दघ्नय
२० था॥ जानुप्रमाणमस्येति जानुदघ्नं जलम्॥ मात्रच यथा॥
आस्यप्रमाणमस्येति॥ आस्यमात्रम्॥ परिमाने द्वयस
च दघ्नच मात्रचः॥ ठक यथा॥ द्वारे नियुक्तः॥ दौवारि

दि

कः॥ तत्र नियुक्त इति ठक्॥ द्वारादीनां च ऐजागमः॥ अ
क्षैर्दीव्यतीति॥ आक्षिकः॥ खानित्रिकः॥ खनित्रेण ख
नतीत्यर्थः॥ मुष्टिना जयतीति मौष्टिकः॥ तेन दीव्यति
खनति जयति जितम्॥ इति ठक्॥ ठस्य कः॥ किति च या
दिवृद्धिः॥ इति सामान्यतद्धिताः॥ यादृशं पुस्तकं दृष्ट्वा
तादृशं लिखितं मया॥ यदि शुद्धमशुद्धं वा मम दोषो न
दीयते॥१॥ भग्नपृष्ठिकटिग्रीवा बद्धमुष्टिरधोमुखं॥

कष्टेन लिखितं ग्रंथं यत्नेन प्रतिपालयेत् ॥२॥ समस्त

गुरुवे नमः ॥ श्री ॥

ज्ञांतं कांतं त्रिवारं प्रणवसहितं यो ब्रुवीति प्रदोषे पश्चपन्नेवेति लिंगे
॥३१॥ व्वषवषणाकरः श्रंगमध्ये सदाभ्यां ॥ सर्ववेदानधीऽक्रमप ता
दसहितामंत्रकोटयस्तु समात्रैलोक्यं तस्य वस्यं सभव ॥३१॥
तिशिव सायुज्यवान् धुत्रपापान् ॥१॥ ॐ नमः शिवाय ॥
ब्राम्हणास्य गुदं ज्ञा रुद्रक्षं दुगास्ति वे ॥ भूमिस्पर्शमात्रेण
ज्ञाकस्यापि श्रियं हरेत् ॥ ॥ ॥

अथाव्यय्स्तद्धितःकतमः ॥ तसिल ॥१॥ त्रल ॥२॥
अधुना ॥३॥ दानीम् ॥४॥ दा ॥५॥ र्हिल ॥६॥ ह ॥७॥ अ
त ॥८॥ थाल ॥९॥ थम् ॥१०॥ अस्तातिः ॥११॥ सधस ॥१२
॥ उत ॥१३॥ अलिर ॥१४॥ समसिण ॥१५॥ एद्यवि ॥१६॥
द्य ॥१७॥ एद्युस ॥१८॥ असुच ॥१९॥ असुच ॥२०॥ आति
रिल ॥२१॥ रिष्टातिः ॥२२॥ एनप् ॥२३॥ आच ॥२४॥
आहि ॥२५॥ धा ॥२६॥ च्यमुञ ॥२७॥ एधाच ॥२८॥ पाश

Dr. BHAU DAJI MEMORIAL

येन प्रकारेण यथा॰

अव्ययाच्च

पू॥२१॥ आम्॥ ३०॥ इति त्रिंशत्संख्ययाः॥ तसिल् यथा॥
यस्मात् यतः॥ तस्मात् ततः॥ प्राग्दिशो विभक्तिरिति वि
भक्तिसंज्ञा॥ त्यदादीनामः॥ इदम इश्॥ इतः॥ एतस्माद
३२ तः॥ एतदोऽशु इति अश्भावः॥ तद्धितश्चासर्वविभक्तिरव्यय ३२
त्वम्॥ अव्ययादाप्सुपः इति सुपो लुक्॥ आदौ इत्यादितः
॥ अन्येभ्योपिदृश्यत इति वचनात्॥ किंसर्वनामब
हुभ्योऽद्व्यादिभ्यः इत्यनेनाधिकृत्य पञ्चम्यास्तसिल्॥

अव्ययाद्विभक्तेर्लुक्॥ अव्ययाद्विभक्तेर्लुक् भवति॥

त्रल् यथा॥ तस्मिन् तत्र॥ अमुष्मिन् अमुत्र॥ सप्तम्या
स्त्रल्॥ अदसोसेर्दादुदोमः इत्यस्यासिद्धत्वं मत्वं च॥ अधुना यथा॥ अ
स्मिन्काले इदानीं॥ दानीं च इति दानीम्प्रत्ययः॥ इदम इ
ती स्भावः॥ दा यथा॥ सर्वस्मिन्काले सर्वदा॥ एकस्मि
न्काले एकदा॥ अन्यदा॥ कदा॥ यदा॥ तदा॥ सर्वैका
न्यकिंयत्तदः काले दा इति दाप्रत्ययः॥ सर्वस्य सोन्य
तरस्याम्॥ र्हिल् यथा॥ तस्मिन्काले॥ तर्हि॥ अनद्यत

नेर्हिल्लन्यतरस्याम्॥अस्मिन्काले॥एतर्हि॥इदमो र्हिल्॥
एतेतौरथोरितिॗ॥पृथ्वयोःपरयोःएतइत आदेशौस्तः॥
हयथा॥अस्मिन्काले॥इह॥इदमोहः॥इदमइश्॥कु
हः॥वाहचच्छन्दसीतिवाहः॥कुतिहोरितिकिमःकु
आदेशः॥अत्यथा॥क॥किमोऽत्॥क्वातीतिक्वादे
शः॥थाल्यथा॥येनप्रकारेणयथा॥तेनप्रकारेणत
था॥सर्वथा॥प्रकारवचनेथाल्॥थम्यथा॥अनेन

प्रकारेणइत्थम्॥इदमस्थमुरितिथम्॥एतेतौरथोरि
तिइदादेशः॥कथम्॥किमश्चेतिथम्॥किमःकः॥अस्ता
तिर्यथा॥पूर्वस्यांदिशिवसतिपूर्वस्याआगतोवापुरस्ता
दागतःपूर्वःरमणीयः॥पुरस्ताद्रमणीयः॥दिक्शब्दे
भ्यःसप्तमीपञ्चमीप्रथमान्तेभ्योदिग्देशकालेषुस्ता
तिः॥पूर्वावराधराणामसिपुरधवश्चैषाम्॥सद्यस्यथा॥

समानेह्निसद्यइतिनिपात्यते॥सद्यपरुत्परार्थेतिसमा
नस्यसंभावोद्यश्च प्रत्ययोऽहन्यभिधीयते॥उत्तयथा॥
पूर्वस्मिन्वत्सरेपरुत्॥आरिलयथा॥पूर्वतरेवत्सरे
॥३४॥ परारि॥पूर्वतरस्यपरभावः॥उद्दारिलौतौप्रत्ययौभ ॥३४॥
वतः॥संवत्सरेभिधेय॥समसिणयथा॥अस्मिन्वत्स
रे॥ऐषमः॥इदमशब्दात्समसिण॥इदमइन्भावः॥त

ह्नितेघन्चामादेः॥आदिवृ ह्निः॥एद्यवियथा॥परत्ति॥उ
परिष्टात्॥ऊर्द्ध्वशब्दस्यउपभावः॥रिलरिष्टातिएतौप्र
त्ययौभवतः॥एनचयथा॥पूर्वेणादेशोरमणीयः॥पू
र्वोदिशोरमणीयइत्यर्थः॥एनेचन्यतरस्यामदूरेपञ्चे
म्याः॥आचयथा॥दक्षिणादेशोरमणीयः॥दक्षिणा
दान्च॥आहियथा॥दक्षिणस्यांदिशिमस्यदूरेवस
तिदक्षिणाहिग्रामाद्वसति॥आहिचदूरेइत्योहिप्र

त्ययः॥धायथा॥कतिप्रकाराः॥बहुधा॥संख्यायाःवि
धार्थेधा॥च्यमुञ्यथा॥एकधा॥ऐकध्यंकरु॥ऐक
ध्यंकुरु॥एकाद्वाध्यमुञन्यतरस्याम्॥धमुञयथा
॥३५॥ ॥द्वैधम्॥त्रैधम्॥द्वित्र्योश्चधमुञ॥एधाच्चयथा॥
द्वेधा॥त्रेधा॥एधाच्च॥पाशप्यथा॥पयस्याशम्॥आ ३५॥
म्यथा॥रन्तरमेवचिरंतराम्॥सुष्टुतराम्॥अतितराम्॥
किमेत्तिङव्ययधादांचाद्रव्यप्रकर्षे॥श्री॥इत्यव्ययवा

मावाख्यास्तद्धितः
चैकैस्तद्धितःकतमः॥त्व॥तल॥इमनिच॥ष्यञ॥यत्॥
य॥ढक्॥यक्॥अञ॥अण॥वुञ॥इत्येकादशप्रत्ययाः
भवंति॥त्वयथा॥पटोर्भावःपटुत्वं॥तलयथा॥पटोर्भावःप
टुता॥तस्यभावस्त्वतलौ॥इमनिचयथा॥गुरोर्भावः॥ग
रिमा॥पटिमा॥अणिमा॥तनिमा॥स्थूलस्यभावःस्थवि
मा॥दीर्घस्यभावः॥द्राघिमा॥बहोर्भावः॥भूमा॥चेतसो
भावः॥चेतिमा॥कृत्स्नस्यभावः॥कृत्स्निमा॥पृथ्यादिभ्य

इमनिज्वा॥ष्यञ यथा॥श्वेतस्यभावः श्वैत्यम्॥नैत्य
म्॥दृढस्यभावः॥दार्ढ्यम्॥सुभगस्यभावः सौभाग्य
३९ म्॥वर्णदृढादिभ्यः ष्यञ च॥हृद्भगसिन्ध्वन्ते पूर्वपद
स्यचेति उभयपदवृद्धिः॥यत् यथा॥स्तेनस्यभावः स्ते ३९
यम्॥स्तेनाद्यन्नलोपश्चेति यत्॥यो यथा॥सख्युर्भा
भावः सख्यं॥सख्युर्य इति यः॥ढक यथा॥कपेर्भा भा
वः कापेयम्॥ज्ञातेर्भावः ज्ञातेयम्॥कपिज्ञात्योर्ढ

क्॥यक यथा॥बृहस्पतेर्भावः बार्हस्पत्यम्॥से
नापतेर्भावः सैनापत्यम्॥प्रजापतेर्भावः प्राजापत्य
म्॥पारोहित्यम्॥पत्यन्तपुरोहितादिभ्यो यक्॥अ
ञ यथा॥अश्वस्यभावः आश्वम्॥उष्ट्रस्यभावः
औष्ट्रम्॥कुमारस्यभावः कौमारम्॥प्राणभृ
ज्जातिवयोवचनोद्गात्रादिभ्योऽञ्॥अण यथा॥

त्रिहायनस्यभावः त्रैहायनम्॥ द्विहायनस्यभा
वः द्वैहायनम्॥ चातुर्हायनम्॥ यूनो भावो यौवन
म्॥ स्थविरस्य भावः स्थाविरम्॥ हायनान्तयुवादि
२१ भ्योऽण्॥ पृथो र्भावः पार्थिवम्॥ मार्दवम्॥ गौरवम्॥ २१
इगन्ताच्चलघुपूर्वात्॥ वुञ यथा॥ रमणीयस्य
भावो रामणीयकम्॥ वसनीयस्य भावो वासनीयकम्॥

त्त
आचार्य्यस्य भावो आचार्य्यकम्॥ योपधाद्गुरू
पोत्तमाद्वुञ्॥ श्री इति प्रयोगविवेके द्वितीय प
टलः॥ ॥ श्रीमार्त्तण्डभैरवाय नमः॥ ॥

परस्मैपदिज्ञेयं	उभयपदि	आत्मनेपदिज्ञेयं॥
तिप्॥ तस्॥ अन्ति॥ प्रथमपुरुष॥	ते॥ आते॥ अन्ते॥ ३॥	
सिप्॥ थस्॥ थ॥ मध्यमपुरुष॥	से॥ आथे॥ ध्वे॥ ३॥	
मिप्॥ वस्॥ मस्॥ उत्तमपुरुष॥	ए॥ वहे॥ महे॥ ३॥	

॥१॥ एषां संज्ञा लट् १८॥

यातू ॥ यातां ॥ युस ॥ प्रथमपुरुष ॥ ईत ॥ ईयातां ॥ ईरन् ॥
यास ॥ तातं ॥ यात ॥ मध्यमपुरुष ॥ ईथास ॥ ईयाथां ॥ ईध्वं
यां ॥ याव ॥ याम ॥ उत्तमपुरुष ॥ ईय ॥ ईवहि ॥ ईमहि ॥
२ एषां संज्ञा लिङ् १८
१८ तुप ॥ तां ॥ अंतु ॥ प्र० पुरुष ॥ तां ॥ आतां ॥ अंतां ॥ १८
हि तं ॥ त ॥ मध्यमपुरुष ॥ स्व ॥ आथां ॥ ध्वं ॥
आमिपू ॥ आवपू ॥ आमप ॥ उत्तमपु० ॥ ऐपू ॥ आवहैपू ॥ आमहैपू ॥
परस्मैपदि १ ॥ २ एषां संज्ञा लोट् १८ ॥ आत्मनेपदि १
उभो १८ उभयपदि ज्ञेयं

ॐ नमः ॥ तद्धितप्रयोगमभिधाय तिङ्प्रयोगमभिधा
स्यामः ॥ तिङ् कतमः ॥ तिङां च नव पूर्वार्द्धं ॥ दश वप
रौ द्विधा ॥ परस्मैपदमाख्यातं तङां नवात्मनेपदम्
१३ ॥ तिपू ॥ तस ॥ अन्ति ॥ सिप ॥ थस ॥ थ ॥ मिपू ॥ वस ॥
मस ॥ तं ॥ आतां ॥ अन्ते ॥ थास ॥ आथां ॥ ध्वम ॥ इट् ॥
२ [illegible] ॥ वहि ॥ महि ॥ २८ ॥ इत्यष्टादश धातु तिङ्: दित्यः ॥ त
च तिङ्मुदे देशीयाः संज्ञा ॥ तत्र प्रत्ययसंज्ञा विभक्तिसं
अंत १ २

Dr. BHAU DAJI MEMORIAL

ज्ञा॥ परस्मैपदसंज्ञा॥ आत्मनेपदसंज्ञा॥ प्रथमपुरु
३९ षसंज्ञा॥ मध्यमपुरुषसंज्ञा॥ उत्तमपुरुषसंज्ञा॥ एकव
चनसंज्ञा॥ द्विवचनसंज्ञा॥ बहुवचनसंज्ञा॥ तत्रकेप्र
त्ययसंज्ञेत्यपेक्षायांसर्वेषांविभक्तिसंज्ञाच॥ तिङांनव ५४
पूर्वाणिवचनानिपरस्मैपदसंज्ञानिस्युः॥ योद्वाव
परौशतृक्वसूचेत्येकादशधापरस्मैपदमुक्तम्॥
तङ् च आनच्च॥ तङित्यनेनतिङामुत्तराणिनवव ३९

चनानिगृह्यन्ते आनजितिशानचकानचोरुत्सृष्टा
नुबन्धयोर्ग्रहणम्॥ एवमात्मनेपदमेकादशधा॥ पर
स्मैचात्मनेभागेवचनानित्रिधात्रिधा॥ त्रयस्त्रपुरु
षाज्ञेयाः प्रथमोत्तममध्यमाः॥ १४॥ उभयपक्षेपिप्र
थममध्यमोत्तमपुरुषावेदितव्याः॥ परस्मैपदभागेप्र
अंति थमा॥ तिप्॥ तस्॥ झि॥ इति प्रथमः॥ सिप्॥ थस्॥
थ॥ इति मध्यमः॥ मिप्॥ वस्॥ मस्॥ इत्युत्तमः॥ एव

मात्मनेपदेष्वपि॥ एकद्विबहुसंज्ञानिपदान्येकैकशा
४० स्तिङाम्॥ ज्ञेयंपरस्मैकर्त्तरिनभावेनापिकर्म्मणि॥१५॥
यानिकानितिङापदानिसंत्तान्येकैकंशएकवचनद्वि
वचनबहुवचनसंज्ञानिभवन्ति॥ परस्मैपदंकर्त्तर्य्ये
वप्रयोक्तव्यंनभावकर्म्मणोः॥ ननुयदिपरस्मैपदंक
र्त्तर्य्येवप्रयोक्तव्यंतर्हिकथंलोकेपच्यत्ति॥ क्रियत्ति ४०
पुरुषकारान्नुवर्त्तयत्ति॥ ताभ्यामितिपच्यत्तिक्रिय

त्ति॥ एतेद्वेशब्दरूपेपरस्मैपदसंज्ञेनभवतः॥ अपितुत
ङ्व्यत्ययेनंतिङ्पदमितिशास्त्रकारवचनप्रमाणादा
त्मनेपदस्थानेपरस्मैपदंकर्त्तव्यम्॥ तस्मात्परस्मैपदश्र
वणेपिआत्मनेपदंज्ञातव्यम्॥ आत्मनेतुत्रिषुज्ञेयं भा
वेकर्म्मणिकर्त्तरि॥ धातोरकर्म्मकाद्भावेप्रथमैकवचस्त
स्या॥ १६॥ आत्मनेपदंभावेकर्म्मणिकर्त्तरिचभवत्ति॥
इत्युक्तेकिम्॥ तर्हिसर्वेभ्योधातुभ्योनापिसर्वेप्रथमम्

ध्यमोत्तमपुरुषाः भवन्ति॥ नापि सर्वाणि वचनानि॥
५२ किन्तर्हि भावे ऽकर्म्मकादेव धातोरात्मनेपदं भवति
प्रथमपुरुषैकवचनमेव भवति॥ यथा स्थीयते॥ न
तु स्थीयन्ते इति कदाचिद्रूपम्॥ सकर्म्मकाकर्म्मका
द्धातोः कर्त्तरि स्मृतमात्मने॥ यत्तु कर्म्मणि निर्दिष्टं क्रि
यते तत्सकर्म्मकात्॥ १७॥ यदात्मनेपदं कर्त्तरि भव ५१
ति॥ तदा सर्वस्माद्धातोः भवति॥ सकर्म्मकादकर्म्मका

द्वेति॥ सकर्म्मकर्त्तावत्॥ कटं कुरुते देवदत्तः॥ स्वरित
इत्यात्मनेपदम्॥ शेते देवदत्तः॥ अनुदात्तेत्यात्मनेप
दम्॥ यदितियत्तुनरात्मनेपदं कर्म्मणि निर्दिष्टं तत्स
कर्म्मकादेव धातोर्नाकर्म्मकात्॥ यथा कटः क्रियते
राजपुरुषेण॥ भावकर्म्मणोरात्मनेपदं॥ प्रथमपुरु
षः केन सह प्रयुज्यते नाम्नैवति॥ यथा जयति ब्रह्म
णः॥ मध्यमपुरुषः केन सह प्रयुज्यते॥ युष्मदेति॥

उत्तमपुरुषः केन सह प्रयुज्यते॥ अस्मदेति॥ नाम्न्येव
५२ सन्नियोक्तव्यः प्रथमः पुरुषो भवेत्॥ त्वं युवां यूयमित्ये
भिस्त्रिभिरेव तु मध्यमः॥१८॥ त्वमिति॥ यथा त्वं जय
सि॥ युवां जयथः॥ यूयं जयथ॥ उत्तमस्तु केन सह प्रयु
ज्यते अत आह॥ अहमावां वयं त्वेभिरुत्तमो नान्यथा
मतः॥ अन्यथा च प्रहासे स्यात्त्वं मन्येऽहं च [illegible] भोक्ष्यसे ५२
॥१९॥ इत्येवमुक्तं भवति॥ उत्तमो न नामपदे सह प्रयु

ज्यते न युष्मत्पदे न सहेति॥ किन्तर्हि अस्मत्पदैरेव
॥ यथा अहं जयामि॥ आवां जयावः॥ वयं जयामः॥ किम
स्मत्पदैरेवोत्तमः पुरुषः प्रयुज्यते नान्यथा॥ अत आ
ह अन्यथेति॥ तथाहि॥ प्रहासः॥ परिहासः॥ एहि मन्ये
भोक्ष्यसे इति प्रहासे प्रयोगः कर्त्तव्यः॥ मन्ये त्वं भोक्ष्यसेऽ
अहमिति॥ मध्यमपुरुषस्थाने उत्तमपुरुषः प्रयोज्यः॥
नान्यत्र॥ उक्तं तिङ्रूपमात्रम्॥ तिङ्प्रयोगस्तु क

४३ श्चिद्विस्तारेणप्रचक्ष्यते॥ अस्तिकश्चित्प्रयोगः॥ य
स्यकर्म्मणिप्रथमा॥ तस्यकर्त्तरितृतीया॥ यथावृक्षः छि
द्यतेतक्षकेन॥ कदाचिद्द्वितीयास्तात्॥ यथावृक्षं छिन
त्तितक्षकः॥ क्वचित्षष्ठी॥ वृक्षस्यरुजतिरोगः॥ रुजा
र्थानांभाववचनानामज्वरेरितिषष्ठी॥ शत्रूणांपिन
ष्टिराजा॥ ज्ञासिनीतिषष्ठी॥ कदाचिच्चतुर्थी॥ ग्रामाय ४३
व्रजतिपुरुषः॥ गत्यर्थेतिचतुर्थीद्वितीयाच॥ द्विक

र्म्मणिजन्तःप्रयोगोविज्ञेयः॥ तस्मात्तिङ्प्रयोगेविष
येद्विकर्म्मणिजन्तः॥ तस्मात्तत्प्रदर्शयिष्यामः॥ णि
जन्तेभ्योधातुभ्यःकर्म्मविवक्षायांकर्म्मण्यभिधे
येद्विकर्म्माणीयेअभिधीयते॥ प्रधानमप्रधानं
च्चेति॥ तत्रकिम्॥ तिङन्तेनपदेनप्रधानकर्म्माभिधीय
ते॥ यतोभाष्यकारएवाह॥ प्रधानकर्म्मण्याख्येयेण्यादी
नांतुद्विकर्म्मणाम्॥ अप्रधानेदुहादीनांण्यन्तेकर्त्तुश्चक

र्म्मणः ॥२०॥ कोऽर्थः द्विकर्म्मकेषु धातुषु कर्म्मविवक्षायांत्ति
५५ ष्टं प्रधानकर्म्माभिधीयते ॥ अपेक्षितत्वाच्चकर्म्मणः प्रथ
मैवमवति ॥ तत्र किमुदाहरणम् ॥ नीयते देवदत्तेन अ
जाग्रामम् ॥ आकृष्यते गौर्गोपालेन व्रजम् ॥ दुहादीनांधा
तूनांप्रयोगे कर्म्मविवक्षायामप्रधानकर्म्माभिधीयतेति ५५
ष्टं पदेन ॥ केपुनर्दुहादयः ॥ दुहियाचिरुधिप्रछिभिक्षि
चित्रामुपयोगनिमित्तमपूर्वविधौ ॥ ब्रुविशासिगुणेन गु

चयत्सचत्ते नदकीर्त्तिमाचरितं कविना ॥ द्विकर्म्मकवच
नं ॥ दुह्यते गौर्देवदत्तेन क्षीरम् ॥ याचिर्यथा ॥ याच्यते रा
जा ब्राह्मणेन धनम् ॥ रुधिर्यथा ॥ रुध्यते गौर्देवदत्तेन
व्रजम् ॥ प्रछिर्यथा ॥ पृछ्यते भिक्षुर्देवदत्तेन ग्रामम् ॥ भि
क्षिर्यथा ॥ भिक्ष्यते गोपालको माणवकेन क्षीराणि ॥ चि
अ ञ् यथा ॥ चीयते तरुर्देवदत्तेन फलानि ॥ उच्यते यजमानो
धर्म्ममृषिणा ॥ शिष्यते शास्त्रं गुरुणा शिष्यः ॥ ण्यन्तेभ्यो

D R BHA
MEMORIAL

धातुभ्यो यः कर्त्ता कर्म्म भवेत्तः स एवाभिधीयते ॥ किमुदाह
४५ रणम् ॥ गच्छति भृत्यो ग्रामम् ॥ गमयति भृत्यं ग्रामं गुरुः ॥
गम्यते भृत्यो राज्ञा ग्रामम् ॥ बुध्यते शास्त्रं शिष्यः ॥ बोध
यति शास्त्रं शिष्यं गुरुः ॥ बोध्यते शास्त्रं शिष्यो गुरुणा
॥ भुङ्क्ते ब्राह्मणः ॥ भोजयति ब्राह्मणं देवदत्तः ॥ भोज्यते ब्रा
ह्मणो ओदनं देवदत्तेन ॥ पठति माणवकः शास्त्रं ॥ पाठय ४५
ति माणवकं शास्त्रमुपाध्यायः ॥ पाठ्यते माणवकः शास्त्र

मुपाध्यायेन ॥ आस्ते आसने अतिथिः ॥ आसयत्यतिथि
मासने नागरः ॥ आस्यते अतिथिरासने नागरेण ॥ क
र्त्तुः कर्म्मसंज्ञायां नीवह्योः प्रतिषेधो वक्तव्यः ॥ गतिबुध्या
त्यादिना नीवह्योः अण्यन्तयोर्य्यः कर्त्ता स णावपि सति
कर्म्मसंज्ञो मा भूत् ॥ यथा देवदत्तो नयति ग्रामम् ॥ नायय
ति ग्रामं देवदत्तेन यज्ञदत्तः ॥ कर्त्तर्य्यनभिहिते कर्म्मणि
पुनरभिहिते ॥ वाह्यते ग्रामं देवदत्तेन ॥ वहति भारं दे

वदत्तो ग्राममम्॥ वाह्यते देवदत्तेन भारो ग्राममम्॥ सर्वत्र प्रत्य
५६ वसानार्थे आदेः एयन्तस्य प्रतिषेधो वाच्यः॥ यत्किञ्चित्का
र्ये प्रत्यवसानार्थे निर्दिष्टम्॥ आदेर्द्धीतोरेकस्य सर्वे
स्मिन्विधौ कर्मसंज्ञा मा भूत्॥ एयन्तस्यादेर्निगरण
चलनार्थेभ्यश्चेत्यनेन सूत्रेण परस्मैपदं प्राप्तं तन्मा
भूत्॥ गतिबुद्धीत्यादिना यः कर्त्ता पूर्वस्तस्य कर्मसं ५६
ज्ञा मा भूत्॥ अथा अत्ति पायसं देवदत्तः॥ आदय

वं
[illegible] ते पायसं देवदत्तेन यज्ञदत्तः॥ तस्य कर्मसंज्ञा
प्रतिषेध इति यदि वक्तव्यो नास्ति॥ एवं प्रतिषेधो भविष्य
ति॥ आदयति पायसं देवदत्तं यज्ञदत्तः॥ जग्धं तस्येति
॥ इदमेषां जग्धं॥ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसाना
र्थेभ्यः इति क्तः॥ अदो जग्धिर्ल्यप्ति किति इति जग्धिरादे
शः॥ अत्र षष्ठीप्रतिषेधो मा भूत्॥ क्तवतिपर्युदासो न
स्यात्॥ अधिकरणवाचिनश्चेति कृत्प्रत्ययस्य प्रयोगे
षष्ठी स्यात्॥ किञ्च स्यात्॥ भक्षेरहिंसायां॥ भक्षेर्द्धौरहिं

४७ सायामर्थे कर्त्तुकर्म्मसंज्ञाप्रतिषेधः॥भक्षयति पिण्डं देव
दत्तः॥अयं णिजन्तश्चुरादिलक्षणः॥पुनर्हेतुमति णिच्
ज्विधीयते हेतुमतिलक्षणे विधीयमानेन एवं प्रयोग
॥भक्षयति पिण्डं देवदत्तेन यज्ञदत्तः॥अहिंसायां किं
॥भक्षयति वलीवर्द्दान् वायसान् यज्ञदत्तः॥कर्म्मसं
संज्ञाप्रतिषेधः॥वहेरनियन्तृकर्तृकस्य॥वहेर्धातो
रनियन्तृकर्तृकस्य ण्यन्तस्य यः कर्त्ता तस्य ण्यन्तस्य ४७
कर्म्मसंज्ञानिषेधो वाच्यः॥वहति बलीवर्द्दो भारं॥वा

य हयति बलीवर्द्देन भारं यज्ञदत्तः॥अनियन्तृकस्येति किं
॥वहति बलीवर्द्दो भारम्॥वाहयति बलीवर्द्दान् भारं
पथिकः॥वलीवर्द्देषु भारो नीयमान इत्यर्थः॥उक्तो
यं त्रिरूपप्रयोगः॥एवं सर्व्वेषु प्रयोगेषु भवति।संक्षेपा
त्रिरूपप्रयोगमभिधाय कृत्प्रयोगमवसरप्राप्तं व
क्ष्यामहे॥कष्टेन लिखितं ग्रंथं यत्नेन प्रतिपालयेत्॥

४८ अद्यापि श्रूयतां घोषो द्वारकायां पुनः नः ॥ अविद्यो
वा सुविद्यो वा ब्राह्मणो मामकी तनूः ॥१॥

४८

सकलात्मने नमः ॥ श्री अथ कृत्प्रयोगाः लिख्यं
ति ॥ कृतस्त्रिष्वपि वर्त्तंते भावे कर्त्तरि कर्म्मणि ॥ अज
पूल्युट्क्तिन्घञो भावे युज कार ङ॰ रा एव च ॥ य॰
थातिङ॰ प्रत्यया भावे कर्म्म कर्त्तृषु भवंति तथो कृत्प्रत्यया अ
पि ॥ भावे तु अच अप् ल्युट् क्ति न घञ युच अ कार अ
ङ॰ रा ॥ इत्येते प्रत्ययाः भावे भवंति न कर्म्मणि नापि कर्त्त

१

रि॥अच् यथा॥पुष्पाणां चयः॥जयः॥क्षयः॥ज्वरः॥प
रः॥धरः॥क्षिपनं क्षिपः॥इत्याद्यजन्तकल्पमूः॥अच प्रस
यान्तं पुंसि नान्यत्र॥एरजिस्य चू॥अप् यथा॥द्वाराणां
४१ निकरः॥दरः॥घरः॥द्वारः॥सरः॥भवः॥जवः॥उपद्र ४१
वः॥उपप्लुवः॥प्रणवः॥अदोरप्॥निग्रहः॥ग्रहवृद्द
निश्चिगमश्चेत्यप प्रत्ययान्ताः सर्वे एते पुंसि॥ल्युट

१

यथा॥ओदनस्य पचनं द्वारणम्॥आसनम्॥वाह
नम्॥यानम्॥शासनम्॥गानम्॥ल्युड्ढिति ल्युट्॥
पचनेम्॥भ्रियते अनेनेति भरनम्॥श्रणा यस्मिन्नि
ति श्रवणम्॥करणम्॥वरणम्॥अधिकरणम्॥क
रणाधिकरणयोश्चेति ल्युट्॥ल्युडन्तं नपुंसकम्॥
क्तिन् यथा॥पुण्यस्य कृतिः॥कर्तृकर्म्मणो कृतीषष्टी॥
गतिः॥मतिः॥स्मृतिः॥बुद्धिः॥भित्तिः॥उदितिः॥अ

२

ह्निः॥पुष्टिः॥तुष्टिः॥प्राप्तिः॥स्त्रियां क्तिन्॥पापचो
भावे घुमास्थेतीत्वम्॥घञ् यथा॥ओदनस्य पाकः
॥यागः॥त्यागः॥वादः॥भावः॥वेदः॥भावे चेति घञ्
५० ॥युच यथा॥कारणा॥चेतना॥छेदना॥यातना॥ ५०
शोषना॥एवमादि॥ण्यासश्रयो युच्॥अकारप्रत्यया
यथा॥चिकीर्षा॥जिगमिषा॥चिकित्सा॥जिघत्सा॥बु
भुत्सा भुक्षा॥तितिक्षा॥जिज्ञासा॥अप्रत्ययादित्यकारप्रत्ययः॥

२

इच्छा॥गुरोश्च हलः इत्यप्रत्ययः॥अङ् यथा॥उपधा॥
अभिख्या॥आतश्चोपसर्गे इत्यङ्॥भिक्षणं भिक्षा॥
रक्षा॥भिदा॥जरा॥त्रपा॥षिद्भिदादिभ्योऽङ्॥इत्यङ्
रीङ् ॥ॠ दृशोऽङि गुणः॥शो यथा॥क्रिया॥कृञः॥श
चेति शः॥इत्युक्ताः केवलाभाववाचिनः॥अथ भिन्न
वाचकाः प्रत्यया उच्यन्ते॥सकर्मकाकर्मकाद्धातोः क्तो
भवेत् कर्मभावयोः॥कृत्याश्चैव खलर्थाश्च तयोरेवा

MEMORIAL

वर्णिताः॥यदाक्तप्रत्ययः कर्म्मणिभुवतितदासकर्म्म
कादेवधातोः॥यदापुनःक्तोभावेभवेत्तदासकर्म्मका
कर्म्मकाधातोः॥यदासकर्म्मकेभ्योधातुभ्यःक्तोवि
५१ धीयते॥तदाकर्म्मण्येववर्त्तते॥यदाअकर्म्मकेभ्यो
धातुभ्योभुवतितदाभावेवर्त्ततेनकर्त्तरीत्यर्थः॥य ५१
दाभावेवर्त्ततेतदासकर्म्मकविभक्तिरूपादीयते॥
षष्टीचोपायते॥यथादेवदत्तस्यभूतमिति॥नपुं

सकेभावेक्तः॥सकर्म्मकोयथा॥देवदत्तस्यगतमिति
॥क्तस्यचवर्त्तमानेअनुदात्तोपदेशेत्यादिनाअनु
नासिकलोपः॥तृतीयाकदाचिदिष्यते॥यथादेवद
त्तेनभुक्तमिति॥कर्तृकरणयोस्तृतीया॥यदापुनः
कर्म्मणिक्तोवर्त्ततेतदातस्यकर्म्मणिप्रथमा॥तस्य
कर्त्तरितृतीयेव॥नान्याविभक्तिरूपादीयते॥यथा
देवदत्तेनावतीर्णसमुद्रः॥रदाभ्यांनिष्ठातोनःपू

४

५२ वस्यद इति निष्ठा तस्य नः ॥ अथ कृत्यानाह ॥ कृत्या
श्चेति ॥ तयोरेव भावकर्मणोः कृत्याः खलर्थाश्च भ
वन्ति ॥ के पुनः कृत्यप्रत्ययाः ॥ तव्यत् तव्यानीयरो य
त् क्यप् ण्यत् खल् तथैव च ॥ युजिभिः प्रत्ययास्त्वष्टौ ५२
कृत्यसंज्ञाः प्रकीर्त्तिताः ॥ तव्यस्तावत् ॥ भोक्तव्यश्चौ
दनो देवदत्तेन देवदत्तस्य च ॥ कृत्यानां कर्त्तरि वे

४

त्ति ॥ यदीषष्टी तदा न तृतीयैव ॥ यथा कर्त्तव्यः हर्त्तव्यः ॥
उपासितव्यः ॥ सेवितव्यः ॥ भवितव्यम् ॥ हसितव्यम्
॥ गन्तव्यम् ॥ श्रोतव्यम् ॥ रोचयितव्यम् ॥ इत्यादि ॥ यथा
तव्यद्रूपं तथा तव्यस्यापि ॥ केवलं पूर्वेषु ॥ स्वरभेदः ॥
अनीयन् यथा ॥ देवदत्तेन हरणीयो धर्मः ॥ स्पृह
णीयं रूपम् ॥ तव्यत्तव्यानीयरः सूत्रम् ॥ कृत्याप्राङ्
ण्वुलेति कृत्यसंज्ञा ॥ यत् यथा ॥ पेयमु~~[illegible]~~ ॥ ~~[illegible]~~
दकम् ॥

५
देवदत्तेन प्राप्यम्॥नेयम्॥ज्ञेयम्॥अचो यदिति य
त्॥ईत् यतीतीकारः॥क्यप् यथा॥स्तुत्यो देवदत्तः॥
शिष्यो बालः॥यतिस्तुत्य॥स्वदृजुषः क्यप्॥कृत्यः
५३ ॥विभाषा कृवृषोः॥भृत्यः॥भर्त्यः संज्ञायाम्॥ण्यत्
यथा॥कार्य्यो धर्म्मः॥भेद्यम्॥भोज्यम्॥भोग्यमिति ५३
॥अहलोर्ण्यत्॥ईषत्करः॥दुःकरः॥सुकरः॥
सुलभः॥दुस्तरः॥सुतरः॥सुगमः॥ईषद्बाधः॥ ५

दुर्बोधः॥ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्॥क
र्तृकर्म्मणोरिति प्राप्ते॥न लोकाव्ययेति षष्ठी निषे
धः॥युच यथा॥कृच्छ्रेणादीयत इति दुर्द्दानम्॥सुदा
नम्॥सुपानं॥आतो युचिति युच॥त्वेः प्रत्ययः॥किं क
र्म्मण्येव वर्त्तते आहोस्विदन्यत्र॥त्रिषु गत्यर्थकादि
भ्यस्तथा चेवादिकर्म्मणि॥अकर्म्मकात्समुत्पन्नो

५८

वर्त्ततेभावकर्म्मणोः॥क्तस्त्रेयोगगत्यर्थादिभ्योधातु
भ्योवर्त्तते॥यत्रचादिकर्म्मणिचत्रिष्वपिभावकर्म्म
कर्तृष्वपिवर्त्तते॥केपुनर्गत्यर्थाः॥गत्यर्थाकर्म्मकश्लिष
५४ शीङ्·स्थावसजनमुहरुहजीर्य्यतिभ्यश्चेत्यगत्यर्था ५४
दयः॥तेभ्यएवक्तोवर्त्तते॥त्रिषुसाधनेष्वपिभवतिभ
यथाकर्म्मणितावत्॥गतोदेवदत्तेनग्रामः॥कर्त्तरि

६

पुनः॥देवदत्तोग्रामंगतः॥भावेपुनः॥देवदत्तेनग
तम्॥धातवस्तुपुनरकर्म्मकाअपिसोपसर्गाःस
कर्म्मकाभवन्ति॥सकर्म्मकोधातुःकर्म्मणियथा॥
अनुशुष्कःसूर्य्येनद्रवः॥शोषःकइतिकः॥श्लिषि
यथा॥आश्लिष्टोकन्यानेन॥कन्यामाश्लिष्टोऽ
यम्॥कर्त्तरियथा॥गुरुमधिशायितोऽयम्॥भावेकि

७

त्वम्॥ अकारस्य कर्त्तरि क्तः॥ उपस्थितो गुरुम्॥ उपस्थि
तं शिष्येन॥ वस यथा॥ अध्युषितो गुरुर्नेन॥ वस
५५ ति क्षुधोरितीट्॥ अध्युषितोऽयं गुरुर्म्॥ अध्युषि
तमनेन॥ वचिस्वपीति संप्रसारणम्॥ जनिर्यथा ५५
॥ उपजनितः पुत्रम्॥ उपजनितः पुत्रः॥ उपजनि
तमनेन॥ रुहिर्यथा॥ आरूढो वानरो वृक्षम्॥

८

आरूढं वानरेण॥ होढः॥ इति ढत्वम्॥ झषस्तथोर्द्धो
ध इति धत्वम्॥ ष्टुत्व ढलोपौ॥ ढ्लोपे दीर्घः॥ जृष
यथा॥ अपजीर्णो देवदत्तश्चैत्रेण॥ चैत्रमपजीर्णो
मैत्रः॥ जीर्णं तेन॥ ॠत इद्धातोः॥ वोरुपधाया इति
दीर्घ इकः॥ रदाभ्यामिति तस्य नः॥ आदिकर्म्मणि
क्तः॥ कर्म्मकर्तृभावेषु वर्त्तते॥ यथा भुक्त ओदन

८

मयम्॥भुक्त्वौदनेन॥अकर्म्मकादिति॥य
द्राक्तः अकर्म्मकेभ्योवर्त्तते॥तदाकर्त्तभावयोर्व
५८ र्त्तते॥कर्त्तरियथा॥शारदिशुद्धानदी॥शुद्धनद्या ५८
॥इष्णुचक्त्कवतुविचतन्भिक्पूकमरच्छषाकनैल्यु
णिन्यञ्चः॥उकारोणुकञटकूटकादादाकर्त्तरिच
स्मृता॥इष्णुजादयःप्रत्ययाःकर्त्तरिवर्त्तते॥कथम्॥ ८

इष्णुचतावत्॥पुत्रमलंकरिष्णुः॥अलंकृञ॥
निराकृञइत्यादिनाइष्णुच॥क्तवत्यथा॥ग्रा
मंगतवान्देवदत्तः॥क्तक्तवतुनिष्ठेतिक्तवतुप्रत्ययः
॥नलोकाव्ययेतिषष्ठीप्रतिषेधः॥विचयथा॥दे
वदत्तस्यउपयुङ्क्-इत्युपयुग्देवदत्तः॥विजुपेच्छंद
सीतिविचौतन्यथा॥कटंकरोतीतिकटंकर्त्ताद

५७

वदत्तः॥नलोकाव्ययेतिषष्टीप्रतिषेधः॥तृन्निति तृन्‌स्याच्छीलत्त्पतद्धर्मतत्साधुष्विति तृन्॥ क्विप्‌यथा॥काष्टस्यभिद्देवदत्तः॥सत्सूद्विषेति क्विप्॥क्मरच्चयथा॥ओदनस्यापद्यस्मरोदेवदत्तः ॥सद्यस्यदःक्मरच्च॥षाकन्‌यथा॥ओदनस्यभि क्षाकः॥जल्पभिक्षकुट्टलुंटवृञःषाकन्॥ल्यु ५७

यथा॥पुत्रस्यनन्दनोदेवदत्तः॥णिनिर्यथा॥राष्ट्र स्यग्राहीदेवदत्तः॥आचयथा॥ओदस्यपचः॥न न्दिग्रहिपचादिभ्योल्युणिन्यचेतिगणत्रयेभ्यःत्र यःप्रत्ययाःभवन्ति॥उकारोयथा॥कटंचिकीर्षुः ॥सनाशंसभिक्षउः॥अतोलोपः॥अणयथा॥कुं भकारः॥कर्म्मण्यण्॥उकञयथा॥यागंकामुकः॥

१० ५८

खलपतपदेसु कञ्॥टकयथा॥सिंधुपिवतीति
सीधुपः॥सामंगायतीति सामगः॥गोपोष्टक्॥
टयथा॥गिरिचरः॥चेरष्टः॥कयथा॥पुत्रस्यप्रि
योदेवदत्तः॥अभिज्ञः॥पर्णस्पाक्षिपोवपुषः३गुप
धज्ञाप्रीकिरः कः॥भावेचोत्तरकालेचल्यपतु
मुन्क्तापूर्व्वकालजाः॥कर्म्मणिप्रथमातेषांद्वि

५८ १०

तीयातुविशेषतः॥ल्युप्तुमुन्क्ताएतेत्रयःप्रत्ययाः
पूर्वकालिकाएवपरन्तुभाववर्त्तित्वेनकर्म्मकर्त्रोः
॥तेषांकर्म्मणिविधीयते॥ल्यप्तावत्॥कटकःप्र
त्यइष्यतेदेवदत्तेन॥समानकर्तृकयोःपूर्वकाले
क्त्वो॥समासेऽनञ्पूर्व्वे क्त्वोल्यप्॥ह्रस्वस्यपिति
कृतीतिनुक्॥त्क्वातोऽसुनूकसुनइतित्रातइत्य

११

५९ व्यपि भावसंज्ञा॥ अव्ययादाप्सुप इति सुपो लु
क्॥ तुमुन् यथा॥ ग्रामो गन्तुमिष्यते देवदत्तेन॥
तुमुन् एवल्लो क्रियायां क्रियार्थायां तुमुन्॥ ण्वुलौ ५१
प्रत्ययो यथा॥ कटं कर्त्तुं इष्यते ज्ञा॥ वर्त्तमाने तु
निर्द्दिष्टे वर्त्तते शतृशानचौ॥ द्रव्यसत्वा परत्वा
भ्यां समासेन न तु सिध्यति॥ शतृशानचौ कस्मि
११

न्काले वर्त्तेते॥ वर्त्तमानकाले कर्तृकारके शतृ
शानौ प्रत्ययौ भवतः॥ शानच प्रत्ययस्तु त्रिष्वपि
वर्त्तते॥ कर्त्तरि कर्म्मणि भावे च॥ वर्त्तमाने तु नि
र्द्दिष्टे वर्त्तते शतृशानचाविति॥ शतृ तावत्॥ कटं
कुर्व्वन् देवदत्तः॥ ओदनं पचति॥ शानच यथा॥
शाकं पचमानो देवदत्तस्तुष्यति॥ कर्म्मणि य

१२

था॥पच्यमानश्रोदनोदेवदत्तेन॥नशोभते
तिलकः क्रियमाणोदेवदत्तेन॥लक्षणहेत्वोः
॥क्रियायाः इतिशातृशानचौ॥लटः स्थानेकि
मु॥शतृशानचधातुभ्यांसिध्यतीत्यतआह॥ ६०
द्रव्यसत्वापरत्वाभ्यामिति॥कोऽर्थः॥उत्तरपद
स्थितेनकर्तृप्रत्ययेनसमासोनभवति॥कथ

१२

मवगम्यतेकटंकुर्वन्॥ओदनंपचमानः॥ग्र
न्थनाशभयादुक्ताश्लोकानांपञ्चविंशतिः॥
परार्थभावंनिर्बोढुंप्रभवेयंभवेभवे॥२९॥प्र
योगलाभचातुर्ये यशोभिलाषिणांकारुण्य
विभासितचेतसांप्रवृत्तिरितितत्रदर्शनेनार्थ
मित्यर्थः॥ ॥इतिप्रयोगविवेकेवररूचिकृतंत

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

१२

तीयः पटलः समाप्तः ॥ शुभमस्तु ॥ सिद्धिरस्तु ॥
शिवपार्वती ॥ शाके १५८९ प्रमाथीनामसंव
६२ त्सरे उदगयने वसंतर्तौ वैशाख शुद्ध ८ भृगु
वासरे गंगाधरदेवज्ञ तत्सुत नारायणदेव ६२
ज्ञ चक्रापुरिस्थितेन परोपकारार्थं लिखितं श्च
पाठकस्तु शु॥भं भवतु ॥ श्रीमार्त्तंड भैरवाय नमः ॥ १३